IJCRT.ORG ISSN : 2320-2882
INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)
An International Open Access, Peer-reviewed, Refereed Journal

# अन्यपुराणेषु दुर्गाचरितानि

डा० संदीप कुमार शुक्ला
असिस्टेंट प्रोफेसर (संस्कृत विभाग)
स्वर्ण जयन्ती महाविद्यालय,
पिपराइच, गोरखपुर ।

"सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ।

भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते □"

अस्मिन् उन्मेषे श्रीदुर्गादेव्याः विभिन्न–चरितानां पुराणान्तरेषु प्राप्तविवरणानि यथाशक्ति निरूप्यन्ते।

**वामनपुराणे दुर्गाचरितानि –** श्रीमद्वामनपुराणे दुर्गादव्याः जन्मवर्णनं, माहात्म्यवर्णनम्, महिषासुरवधवर्णनं, चण्डमुण्ड–वध–वर्णनं, शुम्भनिशुम्भवर्णनं, गौरीविवाहवर्णनं च उपलभ्यन्ते। तत्र आदौ अहम् उमासम्भवप्रकरणं प्रस्तोतुम् इच्छामि ।

**उमासम्भवप्रसङ्गः –** देवर्षिनारदेन पृष्टः ब्रहावित्तमः पुलस्त्य दुर्गादेव्याः समुद्भवस्य प्रसङ्ग प्रस्तुतवान् –

**श्रूयतां कथयिष्यामि भूयोऽस्याः सम्भवं मुने ।**

**शुम्भासुरवधार्थाय लोकानां हितकाम्यया □**

**या सा हिमवतः पुत्री भवेनोढा तपोधन ।**

**उमा नाम्ना च तस्याः सा, कोशाज्जाता तु कौशिकी □**

**सम्भूय विन्ध्यं गत्वा च भूयो भूतगणैर्वृता ।**

**शुम्भं चौव निशुम्भं च वधिष्यति वरायुधैः □**

अर्थात् लोकानां कल्याणाय, शुम्भासुरस्य, निशुम्भासुरस्य च वधाय दुर्गादेवी हिमवतः पुत्री उमा भूत्वा समुत्पन्ना । सा च भगवता शङ्करेण विवाहिता भूत्वा दिव्यायुधैः शुभं निशुम्भं च हतवती। अत्र वामनपुराणे मार्कण्डेयपुराणोक्त दुर्गासप्तशत्यारू शुम्भनिशुम्भवधप्रकारणस्य साङ्ग सरहस्यं वर्णनम् उपलभ्यते ।

देवीमाहात्म्यवर्णनम् (1) कथां श्रावयन् महर्षिः पुलस्त्यः उक्तवान् यत् महिषासुरेण पराजितः देवारू स्व–स्वस्थान भ्रष्टाः सन्तः, स्ववाहनायुधैः सह ब्रह्मणः नेतृत्वे विष्णुं निकषा समागत्य पराजयस्य दुर्दशायाश्च चित्रणं कृतवन्तः। देवानाम् आर्तस्वरं श्रुत्वा भगवान् मधुसूदनस्य, शङ्करस्य पितामहस्यब्रह्मणश्च महान् कोप सञ्जातः। ततः अन्येषा मपि देवानां कोपः समुत्पन्नः। तत्पश्चात् सर्वेषां देवानां तेजसां समूहरू पर्वतरूपेण समुपस्थितः। महर्षिकात्यायनस्य तेजोऽपि तत्र समस्ततेजोभिः सह सहस्ताधिकसूर्यतेजः समन्वितम् इव प्रतीयते स्म। तस्मात् तेजसरू योगविशुद्ध देहा तरलायताक्षी कात्यायनी देवी समुत्पन्ना। ततः महेशादिदेवानां तेजोभिरू तस्याः देव्याः वक्रनेत्रहीनि अंगानि आयुधानि भूषणानि च निर्मितानि अभवन्। तदनन्तरम् सा देवी परममट्टहासं कृतवती सर्वे देवा तां नमस्कृतवन्तः –

"नमोऽस्तु देव्यै सुरपूजितायै या संस्थिता योगविशुद्धदेहा ।

निद्रास्वरूपेण महीं वितत्य तृण्णात्रपाशु इभयदा चकान्तिः 

श्रद्धा स्मृतिरू पुष्टिरथो क्षमा च छाया च शक्तिः कमलालया च ।

मेधा स्मृतिः शान्तिरथेहमाया नमोऽस्तु देव्यै भवितव्यतायै 

ततः परं दैवेः स्तुता दुर्गा सिंहम् आरुह्य अगस्त्येन निम्नतरं कृतं विन्ध्यपर्वतश्रगं जगामः । तत्रैव देवाः सिद्धाः, महानागाः, विद्याधराः, भूतगणाश्च स्थिताः अभवन् ।

**देवीमाहात्म्यवर्णनम्** तस्मिन् विन्ध्यपर्वतशिखरे तपस्तपन्तीं देवीं कात्यायनीं चण्डमुण्डौ अपश्यताम् । तौ चण्डमुण्डौ दैत्यराजाय महिषासुराय देव्याः अतिप्रशंसनीय सौन्दर्यं न्यवेदयताम् तथा च तां परिणेतं प्रार्थितवन्तौ । ततः महासुरः मुण्डं चण्डं विडालनेत्रं, कपिलं, वाष्कलम् उग्रायुधं विक्षुरं रक्तबीजं समाआदिष्टवान् । पुनरू मयस्य पुत्रः दुन्दुभिरू नाम दैत्यः देवीसमीपे प्रेषितः । तत्र दुन्दुभिः गगनस्थः सन् महिषासुरस्य सन्देशं श्रावितवान् –

न सोऽस्ति नाके महीतले वा, स्वर्गेऽपि पातालतलेऽपि युद्धे ।

सर्वाणि मामद्य समागतानि, वीर्यार्जितानीह विशालनेत्रे 

स्त्रीरत्नमग्यं भवती च कन्या प्राप्तोऽस्मि शैलं तव कारणेन

तस्माद्भजस्वैव जगत्पतिं मां, पतिस्तवार्होऽस्मि विभुः प्रभुश्च 

अर्थात् स्वर्गे मर्त्ये , पाताले, युद्धे वा कुत्रापि महिषासुरसदृशः कोऽपि देवरू शक्तिशाली प्रभुः नास्ति, सर्वाणि महिषासुरस्य वशीभूतानि सन्ति । स्त्रीरत्नं कन्यां च मत्वा महिषासुरः आत्मानं सुयोग्यं पतिं स्थापयित्वा कात्यायनीं पत्नीरूपेण स्वशरणम् आगन्तुं निर्दिशति । भगवती कात्यायनी दुन्दुभिमुखात् सन्देशं श्रुत्वा महिषासुरस्य सर्वप्रभुत्वं स्वीकुर्वती अवोचत् यत् मम वंशस्य विशिष्ट–शुल्काख्य नियमानुसारं यदि महिषासुरः मां रणांङगण जेष्यति त्ढ़ि अहं स्वतः तस्य पत्नी भविष्यामि ।

ततो दुन्दुभिः महिषासुरम् उपगम्य देव्या कथितं विवरणं निवेदितवान् । महिषासुरश्च स्वसेनां नीत्वा तद्विन्ध्य शिखरं परितः आवृतं कृतवान् ।

**ब्रह्मवैवर्तपुराणे देवी चरितम्** ब्रह्मवैवर्तपुराणे प्रकृतिखण्डे देवीतत्त्वस्य अनेकविधं स्वरूपं दृष्टिगोचरं भवति । एकचत्वारिंशत्तमाध्यायतः चतुश्चत्वारिंशत्तमाध्यायपर्यन्तम् अध्यायचतुष्टये श्रीदुर्गोपाख्यामम्, राज्ञः सुरथस्य वैश्यसमाधेश्च विवरणम्, सुरथसमाधिमेधस्सम्वादे प्रकृतिवैश्यसम्वादः, श्रीकृष्णकृतदुग्गास्तोत्रम् च शीर्षकणि देवीचरितानि निरूपयन्ति ।

दुर्गापाख्याने श्दुर्गाश नामरू रहस्यम् उद्घाटितम् यत् दुर्गा नाम दैत्यस्य, महाविध्नस्य, भवबन्धनस्य, कर्मणः, शोकस्य, दुरूखस्य, नरकस्य, यमदण्डस्य , जन्मनः, महाभयस्य, अतिरोगस्य, हनस्य च वाचकरूपेण स्वीक्रियते । या देवी एतान् दुर्गादिदैत्यान् हन्ति सा दुर्गा कथ्यते।

अत्र दुर्गायाः षोडशनामानि अभीष्टफलदायकानि सन्ति। यथा – दुर्गा, नारायणी, ईशाना, सर्वमंगला, अम्बिका वैष्णवी, गौरी, पार्वती सनातनी च इमानि नामानि सन्ति। ब्रह्मवैवर्तपुराणे एतेषां नाम्नां सार्थकता च प्रतिपादिता अस्ति।

अस्मिन् पुराणे इदं प्रतिपादितमस्ति यत् श्रीकृष्णेन सर्वप्रथमं देव्याः दुर्गायारू आराधना कृता। ततो मधुकैटभ भपीडितेन ब्रह्मणा दुर्गा आराधिता। तृतीयतः त्रिपुरशत्रुप्रेरितेन शिवेन श्रीदुर्गा पूजिताभवत्। तत्पश्चात् दुर्वाससः शापाद् । द्य भ्रष्टश्रीमहेन्द्रः दुर्गायाः पूजनं कृतवान्। तस्मिन् समये सर्वे मनुयरू देवाश्च इन्द्रेण सह उपस्थिता आसन्।

सुरथसमाधिविवरणे मार्कण्डेयपुराणस्य कथायाः किञ्चित् परिवर्तितं रूपं दृश्यते। अत्र सुरथस्य शत्रुः कोलाविध्वंसी नास्ति अपितु चिरजीवी नन्दी अस्ति। सुरथः राजा अश्वमारूह्य पुष्पभद्रां नदीं गच्छति। तत्र वैश्येन सह प्रीतिः भवति। ततः वैश्येन सह पुष्करं तीर्थं गच्छति। तत्र मेधा ऋषिरू भगवतो कृष्णस्य महिमानं वर्णयन् दुर्गतिनाशाय दुर्गाराधनाय दुर्गायाः शरण गन्तुं निर्दिशति।

अत्र सुरथसमाधिमेधससंवादे प्रकृतिवैश्यसम्वादः विशिष्टः। श्रीकृष्णेन कृत श्रीदुर्गास्तोत्रम् शोभन फल दायकं वर्तते।

**श्रीमद्देवीभागवतपुराणे देवीचरितानि** श्रीमद्देवीभागवतपुराणस्य चतुर्थस्कन्ध अष्टादशनवदशाध्याययोः दुष्टानां भारेण त्रस्ता वसुन्धरा धरणी यदा व्याकूला भूत्वा देवेशं स्वकीयं कष्टं निवेदयति तदा ब्रह्मविष्णुमहेशादिभिः सम्प्राथिता योगमाया समस्तदेवान् प्रति आश्वासनं प्रदर्शितवती देवी उक्तवती– हे देवाः ! अहं अंशावतारेण प्रादुर्भूय जरासन्धप्रभृति– दुष्टानां संहाराय अनुकूलवातावरणम् उत्पादयिस्यामि तत्र भगवान् कश्यपः वसुदेवरुपेण अदितिः देवकीरूपेण भगवान् विष्णुः कृष्णरूपेण एवमेव इन्द्रः अर्जुनरूपेण, धर्मराजः युधिष्ठिररूपेण वायुभीमरूपेण, अश्विनीकुमारौ नकुलसहदेवरूपेण च समुत्पन्ना भविष्यन्ति । तथा च एभिः नाना लीलारू रचयित्वा दुष्टनृपाणां संहारं करिष्यामि । श्रीमद्देवीभागवतपुराणे पञ्चमस्कन्धे मार्कण्डेयपुराणे चित्रितकथानुरुपाम् अतिरिच्य अनेके अन्ये देवीचरितजन्यप्रसङ्गा निरूपितारू सन्ति । यथा –दुर्गासप्तशतीमध्ये महिषासुरस्य जन्मनः तस्य महिषरूप–धारणस्य कारणं नैव चित्रितम् अस्ति किन्तु श्रीमद्देवीभागवतपुराण अस्मिन् प्रसङ्गे एका रोचककथा जनमेजयव्याससम्वादेन प्रकाशिता अस्ति । रम्भः करम्भश्च द्वौ दनुपुत्रों अभवताम् । सन्ततिविहीनौ तौ पञ्चनदपावनजले कठोरं तपरू आरब्धवन्तौ । तयोः करम्भम् इन्द्रः ग्राहरुपेण जले हतवान् । ततरू रम्भः भ्रातुरू मृत्युना कुद्धों भूत्वा स्वशिरः क्षित्त्वा अग्नौ प्रक्षिप्तुम् ऐच्छत् । तस्मिन् तथा कर्तुं प्रवृत्तेसति अग्निदेवः प्रादुर्भूय तं समवोधयत्–अरे दैत्य ! जघन्या आत्महत्या नैव करणीया तव यद् अभीप्सितं वर्तते तद् अहं वररूपेण दात्तुम् इच्छामि । अग्निदेवस्य प्रेरणया रम्भरू वरं अयाचत – हे अग्निदेव ! मम त्रैलोक्यविजयी पुत्रः स्यात्, यस्य प्रयासेन शत्रुसेना पराजिता स्यात् । सर्वे तस्य चरणयोः नतमस्तक भवेयुः । अग्निदेव उक्तवान्– हे दैत्य रम्भ ! तथास्तु ! यस्यां भार्यायां तव चित्तम् आसक्तं भविष्यति । ततः पराक्रमी पुत्रारू उत्पन्नोभविष्यति । संयोगात् रम्भस्य चित्तम् एकस्यां महिष्याम् आसकतम् । फलतरू महिषासुररू महिषस्य रूपधारणं करोति । देवी महिषासुर युद्धप्रसंङगे ताम्रनामकदूतस्य प्रसङ्गः रोचको वर्तते । श्रीमद्देवीभागवते महिषासुरस्य दूतौ वाष्कलद्वर्भूरवौ देवीम् उपगम्य हे देवि त्वं महिषासुरं पतिरूपेण स्वीकुरु । तत्र भगवती उवाच– अरे दुष्ट दैत्यौ ! अहं महिषासुरसदृशस्य पशुरुपधारिणः मूर्खस्य, कामान्धस्य पत्नी नैव भवितुं शक्नोमि। सः महिषासुररू पातालं गच्छतु अथवा मया सह युद्धं करोतु। देवीभागवतपुराणे तारकासुरात् त्रस्तैः देवैः देव्याः स्तुतिः कृता अस्ति। फलतरू देवी हिमालयस्य गृहे समुत्पन्ना अभवत्। श्रीमद्भागवतपुराणे देवीदुर्गायाः उपासनायाः देवीतीर्थानां, व्रतानाम् उत्सवानां च निरुपणम् अस्ति। सृष्टिशुभारम्भे स्वायम्भुवमनुरू देवीं स्तौति। अत्र सरस्वती चरितं, लक्ष्मीचरितं भुवनेश्वारीं चरित, गायत्री चरितं, दुर्गायन्त्रं चादि देवीचरितानि निरुपतानि सन्ति। श्रीमद्देवीभागवतपुराणे रामलक्ष्मणयोः समक्षं जगदम्बायाः प्राकट्यं रोचक–तया द्य निरूपितम्। अस्मिन् एव प्रसंगे सीताहरणानान्तरं श्रीनारदस्य उपदेशेन रामलक्ष्मणाभ्यां नवरात्रस्य व्रताचरणं क्रियते। सुमेरुगिरौ व्रतम् आचरद्भ्यां रामलक्ष्मणाभ्यां प्रसन्ना। द्य भगवती आश्विनमासस्य अष्टम्यां तिथौ निशीथकाले प्रकटीभूता। सा रामलक्ष्मणौ उक्तवती– हे राम ! त्वया पूर्वमपि राक्षसानां दुष्टानां वधाय अनेकानि रूपाणि धृतानि, कार्याणि च कृतानि सन्ति। रावणस्य वधाय त्वं देवानां प्रार्थनाभिरू प्रसन्नो भूत्वा रामरुपेण प्रादुर्भूतोऽसि । अथ जयं लभस्व।

**पद्मपुराणे** सृष्टिखण्डे मधुकैटभयोः वधस्य कथा उपलभ्यते। अत्रैव पार्वत्याः जन्मनः वृतान्तं सविस्तरं निरुपितम् अस्ति।

**विष्णुपुराणे** लक्ष्मीदेव्याः सर्व्यापकतयाः निरूपणं कृतम् अस्ति। तत्र पराशरः कथयति यत् एषा लक्ष्मीः नित्या जगमाता अस्ति। विष्णु अथर्रू अस्ति लक्ष्मीवाणी अस्ति। विष्णुरू नयः लक्ष्मीश्च नीतिः, विष्णुबोधः लक्ष्मीश्च बुद्धिः अस्ति।

**हरिवंश पुराणे देवी चरितम् आधृत्य दुर्गास्तवः प्राप्यते । यथा–**

आर्यास्तवं प्रवक्ष्यामि यथोक्तनृषिभिः पुरा ।

नारायणीं नमस्यामि देवीं त्रिभुवनेश्वरीम् 

त्वं हि सिद्धिर्धृतिर्मेधा श्रीविद्या सन्नतिर्मति ।

सन्ध्या रात्रिः प्रभा निद्रा कालरात्रिस्तथैव च 

आर्या कात्यायनी देवी कौशिकी ब्रह्मचारिणी ।

जननी सिद्धसेनानी उग्रचारो महातपाः 

जया च विजया चौव पुष्टिश्च त्वं क्षमा दया ।

ज्येष्ठा यमस्य भगिनी नीलकौशेयवासिनी 

बह्मरूपा विरूपा च अनेकविद्यारणी ।

विरूपाक्षी विशालाक्षी भक्तानां परिरक्षिणी 

पर्वताग्रेषु घोरेषु नदीशु च गृहेषु च ।

वासस्तव महादेवि वनेषूपवनेषु च 

**श्रीमद्भागवतपुराणे देव्याः** योगमायायाः देवीचरितं निरूपितम् अस्ति। यदा श्रीकृष्णस्य जन्म भवति तदा वासुदेवरू श्रीकृष्णम् आदाय नन्दराजस्य भार्यायारू यशोदायाः समीपे उपस्थापितवान्। तथा च तत्रैव यशोदागर्भसम्भूतां योगमायां नीत्वा देवकीसमीपे उपस्थापितवान्। अष्टमसन्ततेरू जन्मनः सूचनां प्राप्य देवकीसमीपम् आगतस्य कंसस्य योगमायया सह संवादो भवति । यदा कंसरू योगमायां गृहीत्वा शीलापृष्ठे पोथयितुम् ऐच्छत तदा योगमाया तस्य हस्तात् समुत्पत्य आकाशं गता। ततः सा अष्टभूजा सालंकारा दिव्यवस्त्रा सायुधाय भवगती योगमाया देवगन्धर्वकीन्नरैः बहुभिः उपचारैः पूज्यमाना स्तूयमाना च कंसम् प्रति एवम् अब्रवीत्। यथोक्तम्

"किं मया हतया मन्द जातः खलु तवान्तकृत् ।

यत्र क्व वा पूर्वशत्रुर्मा हिंसीरू कृपणान् वृशा □

बहुनामनिकेतेषु बहुनामा बभूव वै ।

तयाभिहितमाकर्ण्य कसः परमविस्मितः □"

उपर्युक्तविवेचनैः स्पष्टीभवति यत् देव्याः दुर्गायाः चरितानि बहुव्यापकानि सन्ति। देव्याः मातृ स्वरुपस्य भारतीय परम्परायाः प्रभावः अन्यदेशीयपरम्परासु अपि दृश्यते। बेबोलेन – असीरीयादिदेशेषु देवी श्अभाश इस्तर आदिरुपेण पूज्यते। हिती सभ्यतायाम् ऋतुदेवस्य तेषुन् इत्यस्य पूजा तस्याः पत्न्या श्हेयतश इत्याख्यया सह प्रचलिता तयोः तुलनां शिवपार्वतीभ्यां सह करोति। फिनीशिया देशे 'अस्तिार्त' विद्यारू देव्यारू उपासना प्रचलिता आसीत्। मिस्त्र देशे आईसीस (आई.सी.आई.एस.) इति मातृदेवी पूज्यते। एषा षड्भूजा दिगम्बरा कथ्यते। फलतरू एतस्याः तुलना देव्या काल्या सह क्रियते। यूनानदेशे एथेना देवी पूज्यते। रोमदेशे मिनर्वा असुरसंहारिणीदेवी सरस्वती मन्यते । चीनीयसंस्कृतौ देव्यारू उपासना विविधरुपेण दृश्यते। तत्र पृथिवी नदी चादयः प्रकृतिदेवतारूपेण पूज्यन्ते। तत्र समक्ष नागी (DRAGONOMEN) प्रसिद्धा देवता अस्ति।

## सन्दर्भ–सूची


1. वामनपुराणम् 21/2
2. ״ 21/3
3. ״ 21/4
4. ' 21/6–21
5. वामनपुराणम् 18/1–4
6. वामनपुराणम् 18/5–6
7. ״ 18/7–8
8. ״ 18/9/17
9. ״ 18/18
10. ״ 18/19

| | | |
|---|---|---|
| 11. | " | 18/20 |
| 12. | " | 18/21 |
| 13. | " | 18/36–37 |
| 14. | श्रीमद्देवीभागवतपुराणम् | 4/18–19 |
| 15. | तदेव | 5/1 |
| 16. | तदेव | 5/5 |
| 17. | तदवे | 5/12 |
| 18. | तदेव | 7/31–34 |
| 19. | तदवे | 7/38–39 |
| 20. | तदेव | 8/2 |
| 21. | तदेव | 3/29–30 |
| 22. | पद्मपुराणम् | 31 तमम् अध्यायः । |
| 23. | पद्मपुराण | 33 तम अध्याय । |
| 24. | विष्णुपुराणम् | 9/17–18 |
| 25. | श्रीमद्भागवतपुराणाम् | 10/4/12–13 |